# Vishnukritam 3 Shiva Stotram

# विष्णुकृतं ३ शिवस्तोत्रम्

## Document Information

Text title : Vishnukritam 9 Shiva Stotram

File name : viShNukRRitaM9shivastotram.itx

Category : shiva, skandapurANa, stotra, aShTaka

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | mAheshvarakhaNDa | aruNAkhaNDa | pUrvakhaNDa | adhyAya 2/12-19||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2025

*sanskritdocuments.org*

# विष्णुकृतं ३ शिवस्तोत्रम्

(अथ विष्णुर्नवाम्भोदगम्भीरध्वनिरभ्यधात् ।
वाचः कृतार्थयन्भूयः शुक्लाः शङ्करकीर्त्तनैः ॥

विष्णुरुवाच)
जय त्रिभुवनाधीश जय गङ्गाधर प्रभो ।
जय नाथ विरूपाक्ष जय चन्द्रार्द्धशेखर ॥ १॥

अव्याजममितं शम्भो कारुण्यं तव वर्द्धते ।
येन निर्धूतमखिलं भक्तेषु ज्ञानमाहितम् ॥ २॥

पालनं सर्वविद्यानां प्रापणं भूतिसञ्चयैः ।
पुराणं च सपुत्राणां पितुरेव प्रवर्धनम् ॥ ३॥

शतानामपि मूर्तीनामेकामपि नवैः स्तवैः ।
स्तोतुं न शक्नुमेशान समवायस्तु किं पुनः ॥ ४॥

त्वमेव त्वामलं वेत्तुं यदि वा त्वत्प्रसादतः ।
भ्रमरः कीटमाकृष्य स्वात्मानं किं न चानयेत् ॥ ५॥

देवास्त्वदंशसम्भूतिप्रभवो न भवन्ति किम् ।
अप्यायस्याग्निकीलस्य दाहे शक्तिर्न किं भवेत् ॥ ६॥

देशकालक्रियायोगाद्यथाग्नेर्भेदसम्भवः ।
तथा विषयभेदेन त्वमेकोऽपि विभिद्यसे ॥ ७॥

अनुग्रहपरो देव मूर्तिं दर्शय शङ्कर ।
आवयोरखिलाधार नयनानन्ददायिनीम् ॥ ८॥

इति श्रीस्कन्दपुराणे माहेश्वरखण्डे अरुणाचलमाहात्म्ये पूर्वार्धे
द्वितीयाध्यायान्तर्गतं विष्णुकृतं शिवस्तोत्रं समाप्तम् ।

स्कन्दपुराण । माहेश्वरखण्ड । अरुणाखण्ड । पूर्वखण्ड । अध्याय २/१२-१९॥

skandapurANa . mAheshvarakhaNDa . aruNAkhaNDa . pUrvakhaNDa . adhyAya 2/12-19..

Proofread by PSA Easwaran

*Vishnukritam 3 Shiva Stotram*

pdf was typeset on May 6, 2025

Please send corrections to *sanskrit@cheerful.com*